नं. ४८००

नाम - कात्यायन श्राद्धसूत्र भाष्यम्

कर्ता - दीक्षित गदाधरः

पत्र ६२ पत्राणि सं. ×

विषयः सूत्रपद्धतिः

कातीयश्राद्धसूत्रभाष्यम्

४८००

4800

6141=62

गदाधर

॥ वासेजैनेयिशाखिनां [redacted]दीक्षितकृता कात्यायनीयश्राद्धसूत्र
व्याख्येयम् २२५० श्लो०

नव· ग· १

ॐ श्रीमन्महागणपतये नमः श्रीवर्द्धमूर्तिर्ज्जयति श्रीलक्ष्मीनृसिंहाभ्यां नमः गृह्यसूत्रनवकं
डिकोपरि गदाधरभाष्यलिखिते शिवं च विघ्नहर्तारं गुरुं श्रीवामनं तथा ऽविकोशगदं चापि वंदे
विघ्नोपशांतये १ कात्यायनकृते श्राद्धसूत्रे व्याख्यापरः सताम् प्रयोगपद्धतिं कुर्वे याज्ञवल्क्यादिस
म्मतां २ तत्र पूर्वां पौर्णमासीमुत्तरां वोपवसेदित्यादिना श्रौतकर्माण्युपदिश्याथातो गृह्यस्था
लीपाकानां कर्मेत्यादिना स्मार्त्तान्युपख्याय ऽवशिष्टं श्राद्धकर्म वक्तव्यमित्यत आह अपरप
क्षे श्राद्धं कुर्वीत श्राद्धमिति कर्मणो नामधेयं तत्र कर्कमते पिंडदानस्यैव श्राद्धमिति नामधेयम्
ततश्च पिंडदानाकरणेऽप्याहुतिः पिंडदानं ब्राह्मणभोजनाग्नौकरणत्रयाणां कर्मणां समुदा
यस्येत्यन्ये श्राद्धशब्दः स्फुटीकृतो ब्रह्माण्डे देशे काले च पात्रे च श्रद्धया विधिना च यत् पितॄनुद्दि १

प्रपितृभ्यो दाने श्राद्धमुदाहृतमिति अपरपक्ष इति कृष्णपक्ष उच्यते समावर्तेपि तिथिः कृष्णपक्षे:
श्राद्धमिति लिंगाच्च योपदीयते सपितर इति अत्र यद्यपि समस्तमाससंबंध्यपरपक्षस्य श्राद्धका
लत्वं प्रतीयते तथापि सूर्यस्यांतरे दर्शनात् कन्याकुंभसंबंधिनो विशिष्टत्वं तत्रापि कन्यासंबंधितः
प्रायतनमत्वं तथा च मनुः अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् हेमंतग्रीष्मवर्षासु पांचय:
ज्ञिकमन्वहं ऋतवपेत् तथा हेमंतग्रीष्मवर्षास्विति यदुक्तं तद्विवेचितं मत्स्यपुराणे अनेन विधिना
श्राद्धं त्रिरब्दस्येह निर्वपेत् कन्याकुंभवृषस्थेर्के कृष्णपक्षेषु सर्वदा कन्यासंबंधिनि अत्र तु पक्षेऽपि
विशेषः तस्मादुभयथासंकीर्तनमालिकापि प्रोष्ठपदापरपक्षेण तेन काप्यपि शुक्लकृष्णपक्षेण
तथा च विष्णुधर्मोत्तरे मार्कंडेयः उत्तरायणाच्छ्रेष्ठं श्रेष्ठं स्याद्दक्षिणायनं चातुर्मास्याश्च तत्रापि

नव॰ प्रथमेकेशवैपिके प्रोष्ठपद्याः परपक्षेतात्रापिचविशेषः पैचम्यूर्ध्वंनतत्रापिदशम्यूर्ध्वंततोप्यति
ग॰ शस्तात्रयोदशीराजन्मघायुक्तातत्तोधिकाप्रोक्ताविनापुत्रं प्रोष्ठपद्यामतीतानायांमघायुक्तांत्रयोदं
२ शीप्राप्यश्राद्धेहिकर्तव्यंमधुनापायसेनतत् ब्रह्मपुराणे श्राद्धपक्षेपक्षस्यकस्मिंश्चकार्यंदिनेवि
भागहीनेपक्षेवात्रिभागंत्वर्द्धमेववाश्राद्धयुज्यतेतत्कस्मापोत्रयोदश्यांमघास्वश्राहद्वितीयम :
2 प्रेतान्पितॄंश्चापियमालयमिति विभागहीनमितिप्रतिपदादिचतुर्दश्यन्तचतुर्दशीचविहायः
पैचम्यादिपक्षोक्तः त्रिभागमितिपक्षतृतीयभागं अनेनदशम्यादित्रिकः अर्द्धमित्यष्टम्यादि
पक्षः कालादर्शात् पक्षाधावचदर्शांतेपैचम्यादिदिगादिव अष्टम्यादियथाशक्तिकुर्यादा
परपक्षिकमितिप्राचाम्तु पैचम्यूर्ध्वंवतत्रापिदशम्यूर्ध्वंततोप्यतीतितिविधुपमौंतरवाक्यैकवा २

कपनापत्रिभागहीनेषष्ठ्यादिविभागमेकादश्यादीत्याह: यत्तुतैरर्थमित्यस्यतृतीयभागोर्थैत्रयोदश्या
दीत्येवेव्याख्यानेहृतेतस्त्वमित्यस्यानन्वयदोषापत्तेर्द्वयमितिकमलाकरभट्टा: कुर्वतेतिविधायकेप
दे अथेदानींविचार्यतेकिंश्राद्धेसाग्निकस्यैवाधिकारउतनिरग्निकस्यापीत्यत्रकर्काचार्याणांनिर
ग्नीति अग्नौकरणरूपस्याग्न्यधिकरणत्वात् उपसंहारेसाग्निकस्यैवशाकिनैतरस्य नयेत्युपत्ति
३ योहोमोलौकिकेग्नौविधीयतइतिनिषेधात् अत्रवदारसंग्रहेपूर्वकमावसथ्याधानेनतत्त्वविं
श्रा. कावककर्मान्तरेप्रहृतिरित्यतोपिनानग्निमतोधिकारइति यत्तुक्तं अग्न्यभावेतुविप्रस्यपाणावे
७७ वोपपादयेदिति तदप्यकृतावसथ्यायुदयिकविषयं अनग्निमतोपिश्राद्धेधिकारइत्येवं
विधाप्रसिद्धिरस्तुइहनदेपदेशोवसतीतिवदनिश्चितम् लेनिनानग्निमत:श्राद्धाधिकारे:

नव॰
ग॰
३

प्रमाणमिति तदिदमनुपपन्नं नित्यनैमित्तिके षह्यि यथाशक्त्यातथाकुर्यादितिस्मृत्यापात्सर्वा
गोयहाराशकस्याप्यधिकारात् अग्न्याभावेन्नयाणौ होमविधानात् अग्न्यसविधानस्यचोक्त
विशेषव्यवस्थायाः प्रमाणमन्यतात् सतिवाशौकरणरहितानि श्राद्धाग्निनैष्ठधिकारानिह
तेश्च स्त्रीशूद्रानुपनीतानामपि श्राद्धोपदेशात्साग्निकानग्निकोभयाधिकारेणविहितं श्राद्धमि
ति सिद्धमितिहेमाद्रिः अपरमक्षे प्रतिपदाप्रभृतिदर्शान्तं प्रत्यहं कर्त्तव्यमिककालः पुनरप
वांतरमाह उर्ध्वेवावत्सर्याः वाश्राद्धोविकल्पार्थः वत्सर्थ्याश्चर्द्ध्वं उत्तरकालेपंचमीप्रभृति
वाकुर्यात् तदुक्तंगौतमेन अथश्राद्धममावास्यायांपंचमीप्रभृतिवा ऽ परस्सस्यति मनुा
स्टनौविशेषः कृष्णपक्षेदशम्यादौवर्जयित्वाचतुर्दशी श्राद्धेप्रशस्तास्तिथयोपथैतानन ३

येतराइति तिथिविषयकंपदांतरमाह यदहः संपद्येततदहर्ब्राह्मणानामत्रपूर्वैर्युर्वीतं च

तुर्दशीविनासर्वासुतिथिषुपंचम्यादिषुवायदहर्यस्मिन्नहनिद्रव्यब्राह्मणयोः संपत्तिः स्यात्तद

हस्तस्मिन्नहनियपादितिब्राह्मणानामंत्र्यश्राद्धंकुर्यात् अथवायदिनेमृताहसंज्ञिकातिथि

र्यपरपदेस्यात्तदहे पूर्वैर्युर्वाब्राह्मणान्निमंत्र्यश्राद्धंकुर्यादितिसंबंधः तथाचपुराणसमुच्चये

यातिथिर्यस्यमासस्यमृताहेतुप्रवर्तते सातिथिः प्रेतपक्षस्यपूजनीयाप्रयत्नतइति यदह

रितिविभक्त्यर्थेऽव्ययीभावः नपुंसकादन्यतरस्यामितिटच्प्रत्ययः ब्राह्मणग्रहणंत्विपा

दिप्रतिषेधार्थं पूर्वैर्युर्वेतिव्यवस्थितविकल्पः असंभावितमिथुनात्पत्न्यादीस्तदहरामंत्रये

त् श्रेणानांप्रयानयमंत्रादितिन्यायेनसंभावितमिथुनानांपूर्वैर्युरेवेतिव्यवस्था रात्रवचा

ॐ. कौक्तंमार्कंडेयपुराणे निमंत्रयेद्धूर्वेद्युः पूर्वोक्तांस्तु द्विजोत्तमान् अप्राप्तौ तद्दिने वापि हित्वा
योषित्प्रसंगिनमिति स्मृतिः माध्ययोतप्रदोषांते भुक्त्वान् शापितान्द्विजान् सर्वायासविनिर्मु
८ क्तैः कामक्रोधविवर्जितैः भवितव्यं भवद्भिः स्थाने भक्ते श्राद्धकर्मणि अभ्युपगमानयसंसेन
पितृपूर्वं निमंत्रयेत् इति पितृपूर्वकं निमंत्रणं त्वन्यशाखाविषयकं कात्यायनमतानुवर्ति
नां देवानां निमंत्रणे पूर्वं देवपूर्वकं श्राद्धमिति वक्ष्यमाणत्वात् पितृपूर्वं निमंत्रणमिश्राद्ध
काशीकाकारः मंत्रस्य विशेषः दक्षिणेजानुमालभ्य त्वं मयात्र निमंत्रितः एवं निमंत्र्य
नियमात् श्रावयेत्पैतृकान्तु यइति राजन्यवैश्ययोस्तु पुरोहितादि निमंत्रणं कुर्यात् इति
राजन्यवैश्ययोरिति वचनात् प्रतिदिनमपरपक्ष श्राद्धकरणे स्मर्त्तव्यं नरो क्रान्तिख्यादिदोषा ८

नास्तितथावकाशोजिमिः नभस्यापरपक्षेतुश्राद्धंकार्यंदिनदिनेनैवनंदादिवर्जंस्यान्नैवनिषिद्धचतुर्द
शीदशम्यादिपक्षत्रयेतुचतुर्दशीवर्जंनीयाकृत्स्नपक्षेदशम्यादावित्यादिमनुवचनेश्राद्धउक्तं स्नात
कान् श्रामेत्र श्राद्धेकुर्यादितिः शेषः त्रयः स्नातकाभवंतीत्यादिनास्नातकलक्षणंवोक्तंकात्यायनेन
श्रयंवापत्नीकनिमंत्रणप्रतिषेधेप्रतिप्रसवः विभार्योहिपत्नीयतिरित्यत्रिणानिषिद्धत्वात् एकेयती
न् निमंत्रयंति तदुक्तंसंपूजयेद्यतिंश्राद्धेपितॄणांतुष्टिकारकं ब्रह्मचारीपतिश्चैवपूजनीयोहिनि
त्यशः तत्कृतेसुकृतंयस्मात्तस्यषड्भागमाप्नुयात् मार्कंडेयोपिभिक्षार्थमागतान्वापिकालेसंप्रा
मितोयतीन् भोजयेत्प्रणिताद्यैस्तुप्रसादोद्यतमानसइति पतिस्तुत्रिदंडी एकदंडिनांश्राद्धे
निरस्तत्वात् तथाहिमुंडान्जटिलकाषायान्श्राद्धेयत्नेनवर्जयेत् शिखिभ्योधातुरक्तेभ्यस्त्रिदंडि

नव.
ग.
५

भ्यः प्रदापयेत् यतिकृच्छ्रीवरंबहुदकंच इतरयोःकलौनिषिद्धत्वात् तथाहि दीर्घकालंब्रह्मच
र्यं वानप्रस्थाश्रमेतथा हंसःपरमहंसश्चकलौनैतच्चतुष्टयमिति गृहस्थान्नाश्नवा वाशाद्यो
विकल्पार्थः पादिकयतिनिमंत्रणनिषेधार्थोवाग्रहइतिकेचित् तथाचजाबालिः श्रद्धेति
येनमांसानिभार्याहीनाश्चयेद्विजाः येचमावलसंचयान्नताञ्छ्राद्धेनिवेशयेत् साक्षन्दीणदोषा
न्गृहस्थाननिमंत्रयेत् तथाचविष्णुपुराणे साधनक्षीणदोषाग्निस्तिविष्णुराणसमन्वयेगृहस्था
कुलसंपन्नाः प्रख्याताः शान्ताविज्ञेयाः पंक्तिपावनाइति श्रोत्रियन्निमंत्रयेदितिशेषः श्रो
त्रियलक्षणमाहदेवलः एकशाखांसकल्पांचषड्भिरंगैरधीत्यच षट्कर्मनिरतोविप्रः श्रो
त्रियोनामधर्मवित् कल्पसत्यग्रहणमाहदेवलः एकशाखांसकल्पांचषड्भिरंगैरधीत्यच ५

5

षट्कर्मनिरतोविप्रः श्रोत्रियोनामधर्मवित् कल्पस्यषष्ठ्यग्रहणमादरार्थं तथाहि जन्मना॰
ह्मणोज्ञेयः संस्कारैर्द्विजउच्यते विद्ययायातिविप्रत्वंत्रिभिः श्रोत्रियउच्यते हद्धान् ज्ञानतयैव
योहद्धान्निमंत्रयोदेत्यर्थः अनवधानस्वकर्मस्थान्स्वजातिविहितकर्मानुष्ठानरतान्निमंत्रयेत् ए
वंमुख्यकल्पंदर्शयित्वानुकल्पंदर्शयति अभावेपिशिष्यान्स्वाचारान् पूर्वोक्तानांब्राह्मणानाम
भावेशिष्यानपिस्वाचारान्निमंत्रयेत् शिष्याब्रह्मचारिणः स्वाचारानिति अग्निपरिचरणगुरुशु
श्रूषाभिरतान् तेषांवैकाल्पनिषयेपिवाचनिकंश्राद्धभोजनं व्यासः अनिंद्यामंत्रितःश्राद्धेभोजयेद्वि
प्रोयथागुरुणोदितः एकामविरोधेनव्रतानांप्रथमाश्रमीति अत्रिः ऋत्विक्पुत्रादयोह्येतेसकु
ल्याब्राह्मणाद्विजाः वैश्वदेवेनियोक्तव्यायद्येतेगुणवत्तराइतिएवंनिमंत्रणीयानुक्त्वाअथवर्ज्या

नव॰ गा॰ ८ नाह हीनाङ्गश्लक्ष्णविक्लिन्नश्यावदन्तविद्धप्रजननव्याधितवंगिश्वित्रीकुष्ठिकुनखिवर्जे हीनाङ्गोऽङ्गश्च
र्म्मसवजन्मान्तरेगुरुतल्पगोऽभूत्तः अथवोभयोर्गोत्रयोर्वेदस्याग्रेस्यविच्छेदः स हीनाङ्गः तत्र क्रियस्य वे
दस्य वेदीव विच्छिद्येते त्रिपूरुषे हीनाङ्गः सन्न विज्ञेयः श्राद्धकर्मणि निन्दित इति शुक्लोति गौरो मण्डल
कुष्ठी वा विक्लियोऽदन्तरः तथोक्तमनुना यस्य नैवापरोष्ठाभ्यां व्याधितेदशनावली विक्लियः स
न्तु विज्ञेयो ब्राह्मणः पङ्क्तिदूषणः विक्लियः पूतिगन्धियोण इति गोभिलीयश्राद्धकल्पभाष्ये श्या
वदन्त इति स्वभावात्कृष्णदन्तः विद्धप्रजननः छिन्नलिङ्गचर्मादादिना त्वप्रसिद्धः व्याधितो व्याधि
युक्तः वंगो हीनाङ्गोऽधिकाङ्गो विकृताङ्गः सेस्थिताश्वेतिश्रुतः कुब्जवक्रमन्द्वहस्तयादादीनां च प्रति
षेधः सिध्यति हीनाङ्गोऽधिकाङ्गोऽधिकाङ्गश्च हीनातिरिक्ताङ्ग इति स्मृतेः श्वित्री श्वेतकुष्ठी गलिताङ्गः ८

कुनखीकुत्सितनखः एतान्वर्जयित्वानिमंत्रयेत् नतुएतादृशैर्वयत्रान्येषांवर्जनंभविष्यति यदेतेउपवेष्ट
याश्तु का किमत्र हि नग्नादीनांनिषेधः हतोनऽधिकारार्थत्वात् उच्यते सत्यं भवन्त्येवाऽर्थान्निषेधोय
दाविहिताउक्ताः सुस्तदा तद्व्यतिरिक्तानामर्थान्निषेधः किंतुविहितानांब्राह्मणानामप्राप्तौनिषिद्धाः
तिरिक्तानन्तरालिकब्राह्मणप्राप्त्यर्थंहिनग्नादिवर्जं अन्यथाविहितब्राह्मणालाभेतदतिरिक्तसमस्तवर्जं
नेश्राद्धकर्मलोपःस्यात् तस्मात्साधुःहिनग्नादिवर्जमितिशिष्टास्तत्रहोतानप्युपवेशयेत् अनिषेधेना
मंत्रितोनापक्रामेत् अनिषेधोलोकापवादरहितत्वेनश्राद्धार्थंनिमंत्रितोविप्रोनव्यतिक्रमंकुर्यात् तथा
चाग्निहोत्रप्रकरणेध्वरकांडेश्रुतिः सहोवाचानिध्यावैमाहषतसोनिघेर्हैतोनाशकमयक्रमितुमि
तुमितितस्मादुहानिघस्पहृतोपक्रामेदिति मनुरतिक्रमेदोषमाहाकेतितस्तुयथान्यायंहव्यकव्ये

द्विजोत्तमः कथंचिदप्यतिक्रामन्यायः शूकरतां व्रजेदिति न केवलं ब्राह्मण एवातिक्रमे दोषो यजमा
नव॰ नस्यापि ब्राह्मणमतिक्रमतो दोषः स्यात् तथा हि यमः आमंत्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत्
ग॰ अतिकृच्छ्रासु घोरासु तिर्यग्योनिषु जायत इति आमंत्रितो वान्यदन्नं न प्रतिगृह्णीयात् निमंत्रितो
विप्रो यदन्नं श्राद्धादिरूपमामान्नं सिद्धं वा न प्रतिगृह्णीयात् भोजनान्तरं वा न कुर्यात् यथाह देवल :
पूर्वं निमंत्रितोन्यस्य यदि कुर्यात्प्रतिग्रहं भक्ताहारोपि वा भुंक्ते सुकृतं तस्य नश्यति अन्येनामं
त्रितस्यान्यश्राद्धग्रहणे दोषमाह मार्कंडेयपुराणे व्यासः भुंक्ते श्राद्धं तु योन्यस्य नरोन्येन निमं
त्रितः दैवे वाप्यथवा पित्र्ये स तन्निष्कृष्यते खगैः यमोपि आमंत्रितश्च यो विप्रो भोक्तुमन्यत्र
गच्छति नरकाणां शतं गत्वा चांडालेष्वभिजायत इति अथोपवेशनमाह स्नातो बद्धोपवीताचा

८ श्रा० ५५

नाप्राङ्मुखाननुपवेश्य पदे देवे मनुष्मान् मनुष्मान्यथाशक्ति पित्र्ये उपवेशयेदिति वाक्यशेषः कीदृशाननुपवेशये
त् स्नातान् कृतात्मवान् पुनः कीदृशान् शुचीन् सूतकादिरहितान् पुनः दृष्टान् श्रोतान् यथाशास्त्रमा
श्रोतान् न यथाकथंचित् एवंभूतान्देवे वैश्वदेवार्थं मनुष्मान् इति वहुवचनात् त्रयादीन् प्राग्ग्रेषु कुशेषु
प्राङ्मुखाननुपवेश्य यथाशक्त्या मनुष्मान् पित्र्ये वादीन् विंत्रयं समुपवेशयेत् द्विगुणं सुदग्ग्रेषु कुशेषु अ
मनुष्मांस्त्र वनवभ्यो वा ग्वेदितव्यं तथा च गौतमः नवावरान्भोजयेदयुजो यथोत्साहं वेति वह्वाडयुरा
णापि सामर्थ्ये पितवभ्यो वा भोजयीत सति द्विजान् नोर्ध्वं कर्तव्यमित्याह केचिद्दोषस्य दर्शनात्
ति अत्र स्नानग्रहणं गौणस्नाननिषेधार्थं अथवा स्मृतिप्राप्तमेवानुवदति अथवा विशिष्टविधिः
तथा च वायुपुराणे सुरभीणि तु स्नानानि गेयर्वं ति तथैव हि आद्येषु तानि योदयाद् धमेयफलं

नव॰
ग॰
८

भेदिति देवलोपि ततोनिहतेमध्याह्नेकृतलोमनखोद्विजान् अभिगम्ययथापूर्वंप्रयच्छेदंतधावने
तैलमर्दनेस्नानेस्नानीयंवस्त्रयुग्मंपौत्रैगौडैर्वैदेपाद्ये स्वदेवस्यपूर्वकमिति आचमनेविशेषो
विष्णुपुराणे उपस्पर्शेकर्तव्योमंडलस्यांतरेदिशि कर्तीर्थेवाहिनैवोपिविधिवद्याम्यतेः सदामं
डलस्यांतरेभागेकुर्यादाचमनेद्विजः सोमपानफलंप्राहगर्गिकाश्यपगोतमाइति तथाचायस्तं
बकुर्युराचमनेविप्राउदीच्यामंडलाद्बहिः अन्यदिच्छयदाकुर्यान्निराश्याः पितरोगताइति अवि
शेषेप्राप्तेविशेषमाह एकैकस्यादङ्गुलान् एकैकस्यपित्रादित्रयस्ययथाशक्तिप्रतिगृह्यमङ्गुला
नयुग्मानुपवेशयेत् पक्षांतरमाह द्वौवादैवेत्रीन्पित्र्ये द्वौवादैवेभ्योद्वौवापित्र्ये त्रवाद्यंतपित्र्यष
सोयदित्यनेनकर्माघ्र्यंपात्मनस्य रीडुक्तइतिरीडांदेशः पत्रेतिचेतिइकारलोपः पितरोदेवता ८

अखेतिपित्र्यत्रस्मिन्नपित्र्येकमेण त्रीन्नपितॄन्देकैकं पितामहस्यैकं प्रपितामहस्यैवैकं याज्ञवल्क्यः द्वौदैवे
प्राक्त्रयः पित्र्य उदक्त एकैकमेवंवेति मनुर्विशेषमाह द्वौदैवे पितृकार्ये त्रीनेकैकमुभयत्र वा भोजये
त्सुसमृद्धोपि न प्रसज्येत विस्तरे सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः पंचैतान्विस्तरो हंति
तस्मान्नेहेत विस्तरे ब्राह्मणेपि यस्माद्ब्राह्मणबाहुल्यादोषो बडतरो भवेत् श्राद्धनाशो भोजननाशः
श्राद्धं तेत्रस्य विस्मृतिः उच्छिष्टोच्छिष्टसंसर्गो निंदादातृभोक्तृषु इति देशकालधनाभावेपवादांत
रमाह एकैकमुभयत्र वा एकं दैवे एकं पितृणामित्यर्थः तथा च ब्रह्मपुराणे देशकालधनाभा
वादेकैकमुभयत्र वा शेषान्वितानुसारेण भोजयेदत्र पक्षे वैप्रमनीति स्मृतिः अयुग्मानपसव्येन पि
तॄन्सर्वान्निमंत्रयेत् पित्रादेः सम्यक् त्रीनेकैकस्यैकमेव वा दैवे षड्वत्तरो द्वौ वाप्येकैकमुभयत्र वेति

मातामहानांचैवं मातामहानामप्येवं सर्वं पंक्त्या भवेयुरित्यर्थः तत्र केचिदिममुपदेशं मन्यमानाः पृथक्
त्वमातामहश्राद्धमिच्छन्ति यदा मातामहेभ्यो ददाति तन्नैदेवमिति तदैतदुपेक्षणीयं अपरे तु पार्वणं कुर्वते
यस्तु केवलपितृहेतुतः मातामहांन कुरुते पितृहा सोपि जायत इति स्कन्दपुराणवचनात् पितॄणा
मिव मातामहानामपि तस्मिन्नेव प्रयोगे दानमिच्छन्ति तच्चातीव युक्ततरं तथा च पितरो यत्र पूज्यन्ते
तत्र मातामहा ध्रुवमिति तेनैवा वैश्वदेविके विश्वेदेवास्तन्त्रेणा वाभ्यत एव पितृभ्यो मातामहेभ्यो पितरएव
सर्वायमन्यः पक्षः तथान्यदपि ब्राह्मणाभावे एक एव यदा विप्राः इतीयोनोपपद्यते पितॄणां ब्राह्मणोपो
ज्योदैवे त्वग्निं नियोजयेत् प्रणीतायात्र मुहूर्तं ततः श्राद्धं समारभेदिति तथा हि पर्यक भोजयेच्छाद्धे दैवं त
त्रकथं भवेत् अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च देवतायतने न्यस्य ततः श्राद्धं प्रकल्पयेत् प्रास्येदग्नौ तद ८

दत्तं तदयाङ्ग्राब्रह्मचारिणा इति श्रद्धान्वितः श्राद्धं कुर्वीत नान्नश्रद्धानिमित्तत्वेनोच्यते यच्छ्राद्धं कुर्वीत स्व·
कालेन स्वकाले तच्छ्रद्दयेत्यर्थः शाकेनापिनापरपक्षमतिक्रामेत् यद्यन्नं न लभेत तदा शाकेनाप्यपरप·
क्षे श्राद्धं कुर्यात् तथा च ब्रह्मपुराणे पयोमूलफलैः शाकैः कृष्णपक्षेषु सर्वदा पराधीनः प्रवासी वा नो
वापि मानवः मनसा भावशुद्धेन श्राद्धं दद्यात्तिलोदकमिति अनेनावश्यंकर्तव्यतामिहिता तत्र हेतुमा
ह मासिमासिवोशनमितिश्रुतेः तदहः शुचिरक्रोधनोऽत्वरितोऽप्रमत्तः सत्यवादी स्यादध्वमैथु
न श्रमस्वाध्यायान्वर्जयेत् तदहस्तस्मिन्नहनि श्राद्धदिने एते नियमाः शुचिर्बाह्याभ्यन्तरवस्त्रनरक्त·
श्रावाधशुद्धिरहितः अथवा शुक्लवासाः शुचिः कषायादेः प्रतिषिद्धत्वात् तथा च हारीतः शुचयः शु
विवाससः स्युरिति अप्रमत्त इति स्वकर्तुमुककालादिषु सावधानः स्वाध्यायं श्राद्धमन्त्रजपादिव्यतिरिक्तवे

नव॰
ग॰
१०

दपाठः मैथुनपूर्वदिनेपि स्यगमम स्यात् अन्येपिदात्तृभोक्तोर्नियमाः स्टम्नुक्ताग्राह्याः यमः पुनर्भोज
नमध्वानेभाराध्ययनमैथुनं संध्याप्रतिग्रहं होमं श्राद्धभोक्ताष्टवर्जयेत् मत्स्यपुराणे पुनर्भोजनम
ध्वानंपानमायासमैथुने श्राद्धकृच्छ्राद्धभुक्चैव सर्वमेतद्विवर्जयेत् स्वाध्यायकलहं चैव दिवास्वापंतथै
वच यानंसुरापानं तद्दिवस्यश्राद्धतस्यैवनिषेधः दंतधावनतांबूलंस्निग्धस्नानमभोजनं रत्यौष
धपरान्नंच श्राद्धकृत्सप्तवर्जयेदिति दंतानां धावने प्रायश्चित्तमुक्तं विष्णुपुराणे रहस्ये श्राद्धोपवास
दिवसे खादितादंतधावनं गायत्र्याः शतसंपूतमंबुप्राश्य विशुध्यती अध्वादिगमने दोषमाह यमः
आमंत्रितस्तुयः श्राद्धे अध्वानं प्रतिपद्यते भ्रमंतीपितरस्तस्य तं मासं पांसुभोजिनः याज्ञवल्क्यः
अध्वनीनो भवेदश्वः पुनर्भोजी तुवायसः होमकृन्नेत्ररोगीस्यात् पाठाद्दायुः प्रहीयते दानं निःफलमे १०

तिप्रतिग्राही दरिद्रता कर्मकृज्जायते तेदासौ मैथुनी प्लकरो भवेदिति मैथुने चाहवियंदत्तः स्मरणं की
र्तनं केलिः प्रेक्षणं गुह्यभाषणं संकल्पोध्यवसायश्च क्रियानिष्पत्तिरेव च इति शातातपः आह्निकत्वापरश्रा
द्धे भुंजेत यत्नेमाहित्ताः पतंति पितरस्तेषां लुप्तपिंडोदकक्रियाः अन्येवनियमास्तत्र तत्रवद्यंते तेनेव श्राद्ध
प्रायान्येगौणतिवभ्यायवाधिताः काम्पिके पिन भवंति यथा तीर्थश्राद्धे अथाउपवासश्च नदीष्वायगर्भा
धाननिमित्तश्राद्धे मैथुने अग्निहोत्रनिमित्तश्राद्धे होमः स्वहितीयविवाहश्राद्धे प्रतिग्रहः एकंकं
न्यादानाभ्युदयिके दाने तीर्थयात्रारंभसमाप्तौ रथधानमेव तेषां परतंत्रत्वात् एवं च स्वयमूहनीयं आ
वाहनादिवाम्यत आवाहनादिवाम्यत आयस्पर्शनात् आवाहनादि आवाहनादारभ्याउपस्प
र्शनात् भोक्तुराचमनपर्यंत यजमानो वाग्यतो भवेत् वाग्यमनलोपे वैष्णवमंत्रजपो विष्णुस्मरणं वा

नव· ग· ११

प्रायश्चित्ते तथा च याज्ञवल्क्यः यदि वागयमलोपः स्याज्जपादिषु कथंचन व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णु
मव्ययं अज्ञानाद्यदि वा मोहात्प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुति तथा च श्रौत
यथाश्रुतिः अथ यद्यावेयमो व्याहरति तस्माद्धैष विष्णुर्यज्ञः परागावर्तते तत्र वैष्णवीमृचं वा यजुर्वा
जपेदित्यादि आमंत्रितांश्चैवं· आमंत्रिता ये ब्राह्मणास्तेपि तावमेवानुष्ठानं कुर्युः नूतिविरचितं स्मार्त्तर
घुपति श्रीमहायाज्ञिकवामनात्मजदीक्षितगदाधरकृतनिर्मिते कातीयश्राद्धकल्पविवरणे प्रथमकण्डि
कादैवपूर्वं८· श्राद्धे श्राद्धस्य पस्पर्शनादि तत्रवर्तते निमंत्रणादि आवमेनपर्यन्तश्राद्धोपत्तिं विक्रियते तत्स
र्वं दैवपूर्वकं कर्त्तव्यमित्यर्थः तथा च देवलः यत्र यत्र क्रियते कर्म पैतृकं ब्राह्मणान्प्रति तत्सर्वं तत्र कर्त्तव्यं
वैश्वदेवस्य पूर्वकमिति पिंडपितृयज्ञवदुपचारः पित्र्ये पितृकर्मणि पिंडपितृयज्ञवत्करणं भवतीत्यर्थः ११

अनेनापसव्यं दद्क्षिणामुखं वामजान्वपातयन्निदिष्टे अतमुनीविधिवद्यनादिपिरोत्थानपर्यन्तं पिंडपिंड
पितृयज्ञोक्तधर्मो भवतीति एतदपवादः अपसव्येन कर्तव्यं सर्वं श्राद्धं यथाविधि सृक्स्रोत्रजपं मुक्त्वा
विप्राणां च विसर्जने अपि च सूक्तस्तोत्रजपं मुक्त्वा पिंडाघ्राणं वदक्षिणं आवाहनस्वागतं चैव विनावप
रिवेषणं विसर्जने सौमनस्समाशिषां प्रार्थने तथा विप्रप्रदक्षिणं चैव स्वस्तिवाचनकं विना पित्र्यमस
व्यकर्तव्यं प्राचीनावीतिना सदेति जमदग्निः द्विगुणास्तु दर्भाः पित्र्ये प्रवर्तने तथुनः पित्र्ये द्वि
हस्तांगादौ द्विगुणीकृता दर्भा भवेति अर्थात् देवे ऋजव इति अत्राह बौधायनः प्रदक्षिणं तु देवानां पितृ
णामप्रदक्षिणं देवानामृजवो दर्भाः पितॄणां सूत्रताः कात्यायनस्सन्तौ विशेषः सपिंडीकरणं यावदृजु
दर्भैः पितृक्रिया सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेदिति दर्भलक्षणं चाक्तं पत्रपार्श्वे कीटशाय

ज्ञियादर्भाः कीदृशाः पाकयज्ञियाः कीदृशाः पितृदेवत्याः कीदृशा वैश्वदेविकाः हरिता यज्ञियाद
र्भाः पीतकाः पाकयज्ञियाः समूलाः पितृदेवत्याः कल्माषा वैश्वदेविकाः अप्रसूताः स्मृता दर्भा
प्रसूतास्तु कुशाः स्मृताः असमूलाः कुतयाश्चैयाज्ञ्यास्तेषा नैवामीश्रुतिः प्रादेशादधिका दर्भा स्त्रिपत्रा
दिषुताश्चापकुशास्तेयाज्ञिकैः प्रोक्ताः स्नानादिषु पवित्रकाः दर्भाः किमर्थं दीयन्ते श्राद्धकालेषु
किं तिलाः किमर्थं वेदविद्ब्राह्मे किमर्थं ह विरुध्यते हर्देतिराक्षसान्दर्भास्तिला रक्षन्ति वास्त
रान् वेदविद्वत्यै ब्राह्मे यतीनां इतमक्षयमिति दर्भाभावे काशादिष्टहीत्वा कर्म कुर्यात् तथा॰
चस्मृतौ कुशाभावे तु काशाः स्युः काशाः कुशसमाः स्मृताः काशाभावे ष्टहीतव्या अन्ये दर्भा यथो
चिताः दर्भाभावे स्वर्णरूप्यताम्रैः कर्मक्रिया सदा कुशाकाशप्रायो दूर्वा यूवगोधूमवल्वजाः स्तव॰ १२

12

र्णैरजैस्तथान्ये दश दर्भाः प्रकीर्तिताः स्नाने होमे तथा दाने स्वाध्याये तर्पणे पिवन्ति पवित्रपाणिदाचादा
सोनः सर्वत्र सर्वत्र ग्रहणे दैवे पित्र्ये वयत्किंचिद्ददाति तत्सर्वमासीनः पविपाणिः सनूदद्यात् पवित्रपा ऽ
णिदाचाणिः कुशपाणिः पवित्रशब्दो ऽत्र कुशवचनः पवित्रे स्थ इति मंत्रलिंगात् अथवास्मृतिश्रा
मे वित्रपाणिमासीनत्वं चात्र सार्थकत्वेनानुवदति तेन वा महस्ते कुशादानमावाहने स्वासीनत्वेनि
षेधयतीत्यर्थः तथा च पठन्ति वामहस्ते धृतोदर्भोरहेरंगवलीस्तथा ललाटे निकटस्थानि राक्षसाः पित
रोगताश्चिति किं वावाहनेनाग्रके त्वा पितृषु कत्तेरासानत्वेन पृक्ते तथा च पुराणे कौ लिंगे अथ प्रोज
लिहस्याय स्थित्वा वावाहयेत्पितॄन्निति प्रश्नेषु पे किमूर्द्ध्वस्य पृच्छन्ति सर्वान्वावाशब्दो विकल्पार्थः
वक्ष्यमाणेषु आवाहनादि प्रश्नेषु पे किमूर्द्ध्वस्य केराघब्राह्मणं पृच्छेत् सर्वान्वा पृच्छेत् तस्य विक

नव० ग० १२

13

ल्पस्याहृदोषडुहृदोषड छन्वायमवस्थितविकल्पोयमिति आह्नकाशीकाकारः तल्पविकल्पश
वायमितिकार्कावार्यादयः आसनेषुदर्भानास्तीर्यविश्वान्देवानावाहयिष्यइतिपृच्छति आसने
षुपीठेषुदर्भानास्तीर्यपीठ्यादंनेकृत्वाविश्वान्देवानावाहयिष्येइतिपृच्छेत् येक्तिमूर्द्धेसंसर्वान्वा
आसन्नान्स्याहस्मरतिः शमीकार्य्यर्यशल्लाश्रकदेवोवारणस्तथा येवासनानिशस्तानिआहेवा
देवतावानेतथान्वश्रीपर्णीवृहणद्धीराजेतुकाम्नकदेवजेसमवामकुलंपीठंयितृणांदत्तमक्त
यमिति आसनेषुदर्भानास्तीर्येतिवदनाहसेविष्टरवद्दानंनिराकृतं कर्कोवार्यास्त्वेवमाहः य
तदास्तरणसामर्थ्यात्स्वर्वमुपवेशनाद्रष्टव्ये पाठक्रमादर्थक्रमस्यवलिष्ठत्वात् आवाहयेत्सनु
ज्ञातोविश्वेदेवासआगतेत्यनयाऽवाह्यावकीर्यविश्वेदेवाः शृणुतेममितिजपित्वापितृनावाहयि १२

षेऽग्निष्वच्छति अत्र तिलैरवकीरणमिति कर्काचार्या आहुः अन्ये तु यवैस्त्ववकीर्येति याज्ञवल्क्याव
चनाद्यवैः कुर्वन्ति द्विजानेकत्वेऽपि न प्रतिद्विजमावाहनावृत्तिः सकृदावाहनेनैवानेकब्राह्मणाधिष्ठा
ने देवताध्यासनसंभवात् आवाहयेदनुज्ञात उशन्तस्त्वेत्यनया वा ऋचावकीर्यायन्तु न इति जपितायहि
यहत्त्वमसेषु पवित्रान्तर्हितेष्वेकैकस्मिन्नप आसिञ्चति शन्नो देवीरिति आवाहयति ब्राह्मणैरनुज्ञातोऽपि
त उशन्तस्त्वेति मन्त्रेण विहृत्यावाह्य पितृब्राह्मणेन अन्तस्तिलान्प्रददाति अपवकीर्यायन्तु नः पितर इति प
ठेत् यत्रेऽग्रेह्नीति यज्ञियाः पालाशादयः यज्ञतिगर्भ्याथरवभावितिष प्रत्ययः तेनैव पालाशाः स्रुचः स्फ
पञ्चस्पराते हि हृत्तायत्तियाः इति हविर्यज्ञकाण्डे श्रुतिः एषामन्यतमेषु चमसेषु अनन्तर्गर्भसाग्रप्रादेश
मात्रकुशद्वयसहितेषु शन्नो देवीरभिषिच्यनेनराकैकस्मिन्नयो निषिञ्चेत् एकैकस्मिन्निति प्रतिपा

त्रेमेत्राहनिरितिदर्शयन्निवम सानोलक्षणंवोक्तंयत्तयाषोंवमसानांतत्वदपामिदेशः स्रुश्चत्तरेगुलाः
नव॰ श्रेगुलंत्तभवेत्खातंविस्तारश्चत्तरेगुलः वैकंकतमयाः सलक्षणास्त्वग्विलाश्चमसास्मृताः अन्योन्यावपि
ग॰ कार्याः स्रुवरिति तत्रैवोक्तं प्रादेशायामा पवित्रलक्षणं छंदोगपरिशिष्टे अनंतर्गर्भिणं साग्रं कौशं
२४ द्विदलमेवच प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् अत्रदेवयात्रेहेयपवित्रेपिहपात्रेत्रीणिभवेति तदु
क्तंचतुर्विंशतिमतेद्वेद्वेशलाकेदेवानांतिस्रस्तिस्रस्तुपार्वणेएकोद्दिष्टेशलाकैकाश्राद्धेषुयेषुनिः
क्षिपेदिति अत्रयाज्ञवल्क्यवचनेनावाहनार्घ्यक्षरणदानानांयद्यपिकोऽप्यनुसमयःप्रतीयतेतथापि
पदार्थानुसमयोबोद्धव्यः तुल्यसमवायेसामान्यपूर्वयोगादितिपरिभाषितत्वात् अस्यार्थः तुल्या
नांप्रधानानांसमवायेएकप्रयोगानुष्ठानेपत्नीयाचरणमेगजातेतन्नसर्वेषांपूर्वंभवति तथासत्यनु

वैणपदार्थाः कृता भवंति यथा श्राद्धे पित्रादिषु ज्यागाराकत्रप्रयोगे क्रियंते तेनत्र निमंत्रणादयः सर्वेषां क
मेण पदार्था अनुष्ठिता भवंति अन्यथा एकैकस्य पित्रादेः सर्वेपागस्य परिसमाप्तौ द्वितीयाय क्रमे क्रमभंगः
स्यात् प्रथमस्य विसर्जने द्वितीयस्यामंत्रणमापद्येत तथा सत्यानुपूर्वी भंगः प्रसज्येत न चैतन्निषिद्धं तस्मादे
कैकपदार्थजाते सर्वेषामपि निर्वाह्य द्वितीयादि निर्वाहः कार्यः एवमपि बहुभिः पदार्थैर्व्यवधानं भवति
तच्चन दोषाय न हि सजातीयैर्व्यवधानमिष्यते तस्मात्सर्वेषां निमंत्रणं पाद्यादि एवं आवाहनमपि आवा
हनाव किरणा जयपमसमुदायरूपं जये ब्रायेत्तन इति मंत्रलिंगात् अत एव ह्येकोद्दिष्टतीर्थश्राद्धनि सश्रा
द्धे सांकल्पिक श्राद्धे आवाहनमिह तौ त्रयमपि निवर्तते कात्यायनस्य पदार्थानु समय एवाभिमतः देवा
वाहनानंतरे पित्रावाहनोक्तेः एकैकस्मिन्नप आसिंचतीति सर्वपात्रेषु जलप्रक्षेपावगमात् तत्तदा

नेतरं एकैकस्मिन्नेव तिलानावपन्तीति विधानात् अत एकैकत्राऽर्घ्यपात्रे जलादिपूर्णान्तं प्रक्षिप्यादौ नीत्वा
नव· निर्वर्त्य पात्रान्तरे प्रक्षेपणमिति मतेन युक्तं किं वा पदार्थानोक्रमानुरोधादपि पदार्थानुसमयेनावाहयेति अतो नि
गं· मंत्रेणादावपि पदावपि पदार्थानुसमयेनाव एकैकस्मिन्नेव तिलानावपति तिलोसि सोमदेवत्यो गोसवो दे
१५ वनिर्मितः प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान्प्रीणाहि नः स्वाहेति तिलोसीत्यनेन एकैकस्मिन्पात्रे
15 तिलानावपति प्रक्षिपति आदौ देवपात्रे प्रक्षिप्य ततः पितृपात्रेषु प्रक्षेपः ननु एकैकस्मिन्नित्यनु
वर्तमाने पुनरेकैकस्मिन्निति ग्रहणं किमर्थं उच्यते तिलोसीति मंत्रे पितॄन्प्रीणाहीति बहुवचनां
तेन पितृशब्देनैकद्वयतादनूहितसकलमंत्रः प्राप्नोतीति तन्मा भूदित्येकैकस्मिन्निति पुनर्ग्रहणं सौवर्णे
राजते औडुम्बरे खड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विधीयते उडुंबरहत्नस्पृतयतियहत्नवमसे १५

षिसनेनैवोक्तत्वात् मणिमयानि शंखशुक्तिस्फटिकादिपात्राणि एषांमध्येराकसपात्राणि तेषांमध्येराकस·
पात्राणि क्रियंते यानि वा विद्यंत इति निषिद्धेतराणि मृन्मयादीन्युच्यंते तथा च छंदोगपरिशिष्टे आसुरेणतु
पात्रेण यस्तु दद्यात् तिलोदकं पितरस्तस्य नाश्नंति दशवर्षाणि पंच च कुलालचक्रनिष्पन्नमासुरं मृन्मयं स्मृ·
ते तदेव हस्तघटितं स्थाल्यादि दैवके भवेत् इति राजते ह्यपि श्राव तडक्तं वायुपुराणे तथा चैव पिंडभोज्येषु
पितृणां राजतं मतं अमंगलं तद्यत्नेन देवकार्येषु वर्जयेदिति पत्रपुटेषु वा वाशब्दो विकल्पार्थः पूर्वसूत्रो
क्तविहितप्रतिषेधार्थ इति श्राद्धकाशिकाकारः स्वर्णोक्तानामलाभे पालाशादियज्ञियवृक्षपत्रपुटेषु वा·
र्घं पूरयेत् तथा चोक्तं मत्स्यपुराणे अर्घ्यपात्रपुटे दत्तामृतीनां वल्लभो भवेदिति तानि च पात्राणि पितृभ्यो·
मातामहेभ्यश्च त्रीणि त्रीणि क्रियंते यत आह एकैकस्यैकैकेन ददाति सपवित्रेषु हस्तेषु यादिवासायः पयसा

नव॰ ग॰ १८

सेवमस्तुर्या अंतरिक्षाउत पार्थिवार्याः हिरण्यवर्णा यज्ञियास्तान आपः शिवाः शं स्योनाः सुहवा भवेति
त्पत्ताविषते अर्घ इति अत्र सपोसलुकपूर्वे सवर्णे केपादाज्याप्याजाल इति वत्र स्यार्थे षष्ठी विभक्तिः एकैक॰
स्य पित्रादेः सेव पित्र्यब्राह्मणहस्तेषु सपवित्रेषु पादित्वा इति मंत्रेण ऽ मुकशर्मन्नूपषते अर्घ इति दद्यात् अस्ता
वित्यजयपादेवत्तेनाम अग्रहणे कार्ये असावित्यपनोद इति परिभाषायामुक्तत्वात् तस्यामयमर्थः यत्र मंत्रमध्ये
असावित्येवं सर्वनामपदं पठितं भवति तत्र तत्सर्वनामपदमपनोदे अपनये वर्त्तते तस्यापनोदमपनयं चेति
बाधनेनकृत्वा तत्स्थाने पष्ठि वदितेन तस्य नाम्नः प्रक्षेपः कार्यः सपवित्रेष्वित्यनेन तत्रैण सर्वब्राह्मण
हस्तेषु सपवित्रेन प्रति हस्तं मंत्राहतिः एकैकस्येत्यनेन प्रतिपुरुषं हस्तार्घदानमिति सूचितं अत्राह का॰
त्यायनः अर्घ्यैत्स्योदके चैव पिंडदानावनेजने तंत्रस्य तु निवृत्तिः स्यात्स्वधावाचन एव चेति अत्रायंप्रका १८

16

रः पितृयौ वेतो ब्राह्मणास्तेषां सपवित्रेषु ज्येष्ठोत्तरेषु हस्तेषु पितुरेकस्यैकोऽर्घो दातव्यः एवं पितामहप्रपिता
महयोः मातामहानामप्येवं ज्ञेयं पवित्राणि यान्यतर्हि योदकमासिक्तानि तान्येव भवन्ति प्रकृतत्वात् अत्रैके पवि
त्रान्तरमुत्पादयन्ति एषामेकत्र विनियुक्तानां विनियोगान्तराभावात् तदयुक्ततरं यथा मन्त्राणां क्रिया पुनः
पुनर्विनियोगः एवं कुशानामपि तथा हि दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणाश्च विशेषतः नैते निर्माल्यतां या
न्ति योजनीयाः पुनः पुनरिति तस्मात्तान्येव भवन्ति अत्रैके विदेकश्येकमेहतौ सकृन्मन्त्रवचने कृतत्वादिति
न्यायेन सकृन्मन्त्रवचनमिच्छन्ति कर्कमतेन तु प्रतिप्रदेयं मन्त्रो ग्रहणवत् तथास्माकमपि अत्रैके विदेवं स्व
यित्वा तदनेनतरे चार्घं दत्वा ततः पित्र्यस्य पात्रजातस्य स्थापनादि कुर्वन्ति तदसत् नहि काण्डानुसमयस्यात्र
प्रमाणमस्ति पदार्थानुसमयोऽयं तस्मात्समाने स्थापने ततो दानेन स्थानान्तरसंभवेऽपि प्रवादोऽयमस्ति ततो वि

कल्याणमिति अत्रैके स्वरयन्त्याद्युग्मं ति तिमन्त्यपुराणोक्तेरेकैकस्यतत् विप्रस्य अर्घपात्रे विनिदध्यादिति·
नव· प्राचेतसोक्ते अत्रैवैश्वदेविके ब्राह्मणसंख्यया यावत्प्राणि कुर्वन्ति कर्कमतेनैकमेव पात्रं दैवे केचिद्धिजहस्तध्
ग· तेपवित्रेषु नेरर्घपात्रे ष्टह्णाति तदनीवमेदं दत्तस्योपादाने प्रमाणाभावात् पादया इत्यस्यार्थः आपः पा
८ नीयानि पयसा संवभूवुः संगमनाद्वभूवुः माधुर्यशीतलत्वादिना राकीभूताः कास्ता आपः या दिव्याः दि
17 वि स्वर्गे भूताः उत अपि या अन्तरिक्षाः आकाशीभूताः उत अपि या पार्थिवीर्याः पृथिवीभूताः उत शब्द उभाभ्यां
संबध्यते किंभूताः हिरण्यवर्णाः हिरण्यं रजतं तेन तत्समानवर्णाः शुक्लवर्णा इत्यर्थः पुनः किंभूताः यज्ञि
याः यज्ञार्हाः ता आपः नो अस्माकं शिवाः क्षेमा भवन्तु न केवलं अपि शं कल्याणायो भवन्तु स्योनाः सुखदा
भवन्तु सुखावासस्तु ब्राह्मणहस्ते कृता भवेत्तित्यनेनैव संबंधः स्योना इति सुखस्य नाम इति यास्कः एके· ८

कमुभयवेत्यस्मिन्पक्षेपि अपात्रत्रयंकार्यं प्रथमे पात्रे स ५ स्रवान्समवनीय पितृभ्यः स्थानमसीति न्युब्जं
पात्रे निदध्याति संस्रवशब्देनार्घपात्रलग्ना योवयवा अभिधीयेते स ५ स्रवोऽस्रेवा खलु परिशिष्टो भवनी॰
लिङ्क्तिवाक्यात् प्रथमे पात्रे पितुः प्रथमे अर्घपात्रे संस्रवान्समवनीय निदिध्य पितृभ्यः स्थानमसीत्यनेन
मन्त्रेण तत्प्रथमे पात्रे न्युब्जमधोमुखं निदध्यात् अत्राह यमः पैतृके प्रथमे पात्रे तस्मिन्पैतामहं न्यसेत् प्र॰
पितामहं ततो न्यस्य नोद्धरेन्न विचालयेत् पैतामहं संस्रवमित्यर्थः पुराणे विशेषः आसिंच्य प्रथमे पात्रे स
र्वपात्राणि संस्रवान् ताभिरद्भिर्मुखं सिञ्चेद्यदि पुत्रमभीप्सति वर्तुलं शान्तिमते संस्रवान्प्रथमे पात्रे नि॰
णीयाद्भिर्मुखं स्पृशेत् अद्भिर्मुखस्पर्शनं सपुरुषार्थतादिह कृतावग्रहतिः तत्रान्तर्नीकरणे पितृब्रा॰
ह्मणस्य वामपार्श्वे तथा च मत्स्यपुराणे यादिव्येत्यर्घमन्त्रं जप्त्वा गन्धादिके ततः वस्त्रोत्तरेवा गन्धं दद

नव॰ ग॰ १८ तासेस्तवमादितः पितृपात्रेप्रदायाथस्तुत्रमुत्तरतोन्यसेत् इति उत्तरशाखोवामवचनः सचाचाराम्भोद्धुरेवब्रा
ह्मणाह्नलगलितार्घोदकानिपितृपात्रेप्रसिंच्यद्दक्षिणाग्रेषुकुशेषुपितृभ्यः स्थानमसीतिसपवित्रेस्तुत्र
कृत्वातस्योपर्यर्घ्यपात्रपवित्राणिदक्षिणातिलपुष्पादिदक्षिणातत्पात्रमासमासेनैवालयेन्मातामहेषुचैवमि॰
तिस्मृत्यर्थसारे अत्रगंधपुष्पधूपदीपवाससांचप्रदाने ग्रन्थास्मिन्नवसरविप्रेभ्योगंधादिकंदद्यात् गंधादी
नांस्मृत्यंतरोक्तविशेषोऽहदवः वेदनकुंकुमकर्पूरागरुपद्मकान्यलेपनार्थे इतिविष्णुनोक्तं पुष्पे पद्मोत्पल
मल्लिकायूथिकाशतपत्रचंपकानिगंधरूपसंयुतान्यपिश्वेतानि धूपे घृतमधुसंयुक्तं गुग्गुलश्री
वेष्टागरुसादिद्यात् प्राणिजंगसर्वधूपार्थेनदद्यात् दीपे शोवः घृतेनदीपोदातव्यस्तिलतैलेनवा
पुनःवसामेदोऽस्थंदेपवर्जयेत् वस्त्रे शुक्लं सूक्ष्मंमहतंसदशंचवस्त्रं दद्यात् वकारोः नृत्तमसः १८

18

मवयार्थः तेनसतिसंपत्तौसत्त्वातिरिक्तेभ्योन्यदपिदातव्यं तथावायुपुराणे लोकेश्रेष्ठतमंसर्वमात्मनश्चा
पियत्प्रियं सर्वंपितृणांदातव्यंतदेवाक्षयमिच्छतेति यज्ञोपवीतंयोदद्याच्छ्राद्धकालेतुधर्मवित् पावनंसर्ववि·
प्राणांब्रह्मदानस्यतत्फलं दानेनपितृसंप्रदानकं प्रतिपत्तिस्तब्राह्मणेषु अत्रयद्यपिगंधपुष्पधूपदीपाच्छा
दनाह्वानामिलितानांप्रदानेप्रतीयते तथापिसत्स्वंतरदर्शनाद्गंधादीनामेकैकंदेवायदिमतामहाद्येनमुक्त
त्यदद्यात् तथाबह्वृचगृह्यपरिशिष्टे गंधोदकंचदातव्यंसन्निकर्षक्रमेणतुगंधान्ब्राह्मणसात्कृत्वापुष्पाण्य
तुमवानिच धूपंचैवानुपूर्वेण अग्नौकुर्यात्ततःपरमिति वस्त्रालाभेमूल्यंवा अलाभेउत्तरीयंयज्ञोपवीतंवादद्या
यादितिसत्यसंसारे अस्मिन्नवसरेब्राह्मणाग्रेभोजनभाजनानिनिधायमंडलानिकुर्यात् अत्राहप्रचेताः
चतुष्कोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्यतु मंडलाकृतिर्वैश्यस्यशूद्रस्याभ्युक्षणंस्मृतमिति ब्रह्मपुराणे

नव॰
ग॰
१९

19

मेऽस्मानिवकार्याणि नैवारैस्मूर्णिकैः शुभैः गौरमृत्तिकयावापिप्राणिनि नवमभस्मना प्राणिनश्चावसथ्याग्नि
स्तदीयेन नवमभस्मनात्तत्रमंत्रः यथावकाशुयोविस्तुस्तैलोकंचपदिरक्षति एवंमंडलमभस्मैतत्सर्वंभस्मतानिरक्ष
तिति इतिगदाधरभाष्ये द्वितीयाकंडिका २ उद्धृत्यहृताक्तमनेष्टश्चक्तत्यग्नौकरिष्यइति वैश्वदेवादन्नाउद्धृत्य
हृताक्तमनेहृतत्सुतमनेयाग्नौतरेकृत्वा ततः इष्टश्चक्तत्यग्नौकरिष्यइत्यनेनमंत्रेण प्रश्नस्वरूपनिर्देशार्थइति
कारः अतएवपर्यायोत्तरेणप्रश्नाभावः हृताक्तमितिनिष्ठाभूतेर्थे ततश्चापिक्तत्संपवाभिचारणे स्मृतिः
तथ्यश्रयपतितास्मिन्नपिश्रितन्यान्यप्रत्यानयत्यग्नौवेदेवेभ्योजगद्भ्यउद्धरतिमनुष्येभ्योथैवंपितृणामिति
पिंडपितृयज्ञेहेतृपन्यासात् पिश्नतस्यापितृत्वपत्वात् हृताक्तश्चहणंस्पशाकादिनिवृत्त्यर्थम् तथाव
विस्नुपुराणे उद्धृपाह्येजनदारवर्जमिति कुरुक्षेत्रमुद्गतानः पिंडपितृयज्ञवदुत्वाऽङ्नशेषंदत्ताया १९

त्रमालभ्य जपति पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहेति ततः पंक्तिमूर्द्ध
न्येन सर्वेण वाकृष्टेत्यनुज्ञातः पिंडपितृयज्ञवद्धुताद्धुतशेषं ब्राह्मणभोजनेषु दत्ता पात्रमालभ्य समेतात् स्पृ
ष्ट्वा पृथिवी त इतीमं मंत्रं जपेत् पात्रमालभ्यत यः नतु मंत्रांते आलभेत पात्रोद्देश्यमानत्वात् मतिपात्रमा
लंभनं पिंडपितृयज्ञवदुपचार इत्यनेन पिंडपितृयज्ञातिदेशश्चोक्तः पुनः पिंडपितृयज्ञग्रहणं परिस्तरणा
णादिपदार्थनिवृत्त्यर्थं द्रष्टव्यं होममात्रस्यातिदेशः स चायमग्नौकरणहोमः साग्निनावसथ्येऽग्नौ क
र्त्तव्यः तथा च याज्ञवल्क्यः कर्म स्मार्तं विवाहाग्नौकरणहोमश्चावसथ्ये भवति नच प्रकृतिविकृतिभावे
नास्य श्रौतत्वे कार्यातिदेशात् स्वरूपातिदेशात् अवहननफलीकरणपूर्वकचर्वादिप्रहृतिरपि स्यात्
कार्यातिदेशात् पुनरितिकर्तव्यतामात्रमेव प्राप्नुयात् अतः स्मार्तत्वादावसथ्याग्नावेव होमः आहिताग्नि

नव॰
ग॰
२०

स्कन्जुहुयाद्दक्षिणाग्नौसमाहितइतियत्मार्कण्डेयवचनोक्तंतत्सर्वाधानपक्षेज्ञातव्यं आहृत्यदक्षिणा
ग्निंतुहोमार्थंवैप्रयत्नतः अग्न्यर्थेलौकिकेवापिजुहुयात्कर्मसिद्धये इतिवायुपुराणीयमपि श्रौयव
सथ्याहरणपक्षेवेदितव्यं अग्न्यभावेमनुराह अग्न्यभावेतुविप्रस्यपाणावेवोपपादयेत् योह्यग्निःस
द्विजोविप्रैर्मन्त्रदर्शिभिरुच्यतेइति कात्यायनः पित्र्येयः पंक्तिमूर्द्धन्यस्तस्यपाणौवाथद्विजेस्रुवा अज
कर्णे अश्वकर्णेवागोष्ठेवाथशिवान्तिकेइति पाणिहोमपक्षेअनुज्ञावचनेनमन्त्रः प्रकृतित्वात् हुतशे
षंदत्तमितिविशेषावीनुल्लेखात्साधारण्याद्दैवेपित्र्येचदेयमितिकर्काचार्यमतं कल्पतरुरमिति हेमा
द्रिमितावराणांमतेपित्र्येएव यत्तदुभयेसमन्त्ले शाखायनिः हुतशेषंपूर्वंदैवेदत्वाततस्स्यात्पित्र्ये
दद्यादिति यमः अग्नौकरणशेषंतुपित्र्येनप्रतिपादयेत् प्रतिपाद्यपितॄणांतुनदद्याद्वैश्वदेविकेइति २०

२०

पमेप्रदीयके अग्न्यभावेत्तविप्रसहस्तेऽङ्गुल्यादक्षिणे शेषयेत्पितृविप्रार्थेपिंडार्थेशेषयेमन्नमिति पात्रमाल
भ्यजपतीत्यत्रपात्रस्यमोत्राालेमइतिकेचित् तदसीवमेदंयथा गार्हहैयत्यमुत्तरेणोदपात्रेनियायालभन
इत्यत्रकर्काचार्यैः यात्रालेभउक्तस्तथात्रापिपात्रालंभएव ब्रह्मपुराणेविशेषः दक्षिणंतुकरंकृत्वावामो
परिनिधापयेत् देवंपात्रमथालभ्यपृथिवीतेपात्रमुच्चरन् दक्षिणेपरिवामवपित्र्यपात्रस्यालंभनमिति
पृथिवीतेपात्रमित्यस्यार्थः हेअग्नौकरणशेषतेतवपात्रंआधारःपृथिवीविख्याधारस्तत्रापिधानेद्यौ आका
शे त्वाअमृतेजुहोमिशेषंब्राह्मणस्यमुखेजुहोमि किंलक्षणे अमृते अमदक्षभक्षणादिभिरहृषितमित्यर्थ :
ब्राह्मणस्यमुखेअग्निसदृशेत्वाअमृतेजुहोमीतिवाक्यार्थः ब्राह्मणस्याग्निसदृशत्वमाहायह्नवः पि
तरोत्रदेवताब्राह्मणस्त्वाहवनीयार्थइति वैलव्यवायज्ञषावोगृहमन्वेवगाह्यापहताइतितिलावप

नव॰
ग॰
२१

21

कीर्यं वाशब्दो विकल्पार्थः नियतान्तरपादावसनाऽऽरक अनियतान्तरपादावसानेयत्नरुच्यते अत्राऽऽगि
देविष्णुः विष्णोहव्यं रक्षेतियत्नः इदं विष्णुरित्यत्रे द्विजोगुष्ठंनिवेशयेदिति वचनात् तयोरन्यतरेण ब्राह्मण
भाजनस्थिते अत्रे द्विजोगुष्ठमयोमत्वंनिवेशनायहनाऽइति मंत्रेण ब्राह्मणानामग्रतो भूमावेव तिलान् प्र॰
किरेत् रक्षोघ्नत्वादुदङ्मुखानामिति कर्क्कः अविशेषादितरेषामपीति केचित् तत्र स्वतएव रक्षोघ्नत्वात्ते
षांपरिवेषणमाह उत्सृष्टं स्विष्टमत्रं दद्यात् यावत्सु स्वे भवेदन्नं तावद्देयं स्विष्टं च ब्राह्मणाय प्रेताय कर्त्रे वा
रोचते अन्नं भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं चविधं पयपयत्रसूत्रकृतासामान्येनोक्तमन्नं दद्यादिति तद्यापि
स्मृत्यन्तरादर्शयेत्व्रीहिशालियवगोधूममुद्गमाषमुसलकालशाकसेंठीमरीचहिंगुगुडशर्कराकर्पूरसैंधवस
मारयनसनारिकेलकदलीवदरगव्यंपयोदधिघृतपायसमधुमांसकप्रभृतीनिदद्यात्समस्पंदेवत्रगातेषा २१

हुः सत्वंयान्यमुच्यते आमान्नं वित्तवर्जिते ये पक्वमन्नमुदाहृतमिति परिभाषणात्केचिदत्र पक्वमेवान्नमित्याहुः
परिवेषणं तूभाभ्यामपि हस्ताभ्यामादाय कुर्यात् तदुक्तं मनुना उभाभ्यामुपसंगृह्य स्वयमन्नस्य वर्द्धितमि
ति विशेषमाह कार्ष्णाजिनिः अपसव्येन वर्तव्यं पित्र्यं कर्म विशेषतः अन्नदानादृते सर्वमेवं मातामहेष्व
पीति अपसव्येन यस्त्वन्नं ब्राह्मणेभ्यः प्रयच्छति विष्ठामश्नंति पितरस्तस्य सर्वे द्विजोत्तमाः इति तद्देतदानेप
रिवेषणमेव शक्त्या वा भिक्षान्नाभावे यदन्नं स्वशक्त्यादातुं शक्यते तद्देयमित्यर्थः अस्मिन् समये अन्नसंक
ल्पः कार्यः तत्रैवं प्रयोगः इदमन्नं परिदत्तं यद्दास्यमानं तृप्तिपर्यंतं तत्सर्वं विश्वेभ्यो देवेभ्यः स्वाहा ततोऽमुक
सगोत्रेभ्योऽस्मत्पितृपितामहप्रपितामहेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः इदमन्नं परिदत्तं यद्दास्यमानं तृप्ति
पर्यंतं तत्सर्वं तेभ्यः स्वधेति मातामहानामप्येवं संकल्पं कुर्यात् यद्यप्यत्र ब्राह्मणानां हस्ते उदकदानं आ

नव॰
ग॰
२६

22

स्नातेनास्मिंस्तथापि शास्त्रांतरस्थत्वात्कर्तव्यं द्विजैश्च यथोक्तदानादिप्राणाहुत्यंताः सर्वेऽपि भोजननियमा विधेयाः
कवलं भूमौ बलिहरणमेव न कार्यं तत्र बलिकरणे महादोषश्रवणात् अथ स्नात्वा जपेद्व्याहृतिपूर्वां गायत्री
ध्रुवं सप्रणवां वा ध्रुवसकृत्त्रिर्वा रात्रौ द्वौ पित्र्यमंत्रान्पुरुषसूक्तमप्रतिरथमन्यानि वा पवित्राणि एकवार
मिति सकृत्त्वारत्रयमिति त्रिः अत्र संख्याव्याहृतिगणनेऽर्थे हि त्रिवर्तुर्थ्यभ्यः सव इति सवोपपादते नत्री
त्यग्रे सवृप्रत्ययः एकस्य सकृद्वेति सत्वेऽणैकस्य सकृदादेशः सवृप्रत्ययप्रयोकार्थं अशक्तस्त्वशाह्नयणेष
व्याहृतिपूर्वां गायत्रीं सप्रणवां सकृत्त्रिर्वा जपेत् संहितास्वरेण पठेत् तत्रायं क्रमः प्रणवं प्राक्पठंजी
तव्याहृतिस्तदनंतरं सावित्रीं चानुपूर्व्येण ततो वर्णान्समुच्चरेत् रात्रौ द्वीकृ एतत्पाजस्यायाः पंचवर्णाः
पित्र्यमंत्राउदीरतामवर इत्याकादि त्रयोदश वर्णाः पुरुषसूक्तं सहस्रशीर्षेत्यादिकाः षोडश वर्णाः अप्रतिरथं आशुः २२

शिशानइत्याद्याः सप्तदशर्चो द्वादशर्चो वा अन्यानि रुद्रप्रभृतीनि अग्नये कव्यवाहनाय स्वाहेत्यादीत्यन्तमंत्रानुज
येत् अत्रजपयवपदेशस्नानस्वरवाधनार्थः मनुः स्वाध्यायश्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हीति मत्स्यपुराणे
विशेषः ब्रह्मविष्णर्करुद्राणां स्तोत्राणि विविधानि च इंद्रस्य सोमसूक्तानि पावमानीस्तथा शक्तिः बृहद्रथंत
रं तद्वज्ज्येष्ठसाम सरौरवं मंडलब्राह्मणं तद्वत्प्रीतिकारी च यत्पुनः विप्राणामात्मनश्चैव तत्सर्वं समुदीरये
त् इंद्रादिसूक्तानि ऋग्वेदे प्रसिद्धानि पुनन्तमेत्याद्याः पावमान्यः त्वामिद्धि हवामह इत्यस्यां बृहद्गी
यते यत्तद्बृहत्साम अभित्वाशूरनोनुम इत्यत्र रथंतरं मूर्धानं दिव इत्यत्र ज्येष्ठसामः पुनानः सोमेति रौरवं
वैवावमिति शांतिकाध्यायः यदेतन्मंडलं तपतीत्यादिरहस्ये मंडलब्राह्मणं प्रसिद्धं इयं पृथिवीति बृहद
दारण्यके मधुब्राह्मणे गरुडपुराणे योविष्णुहृदयं मंत्रं श्राद्धेषु नियतः पठेत् पितरस्तर्पितास्तेन

नव०
ग०
२२

23

पयसा वहतेन च चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च इयतैव पुनर्द्वाभ्यां सममे विष्णुः प्रसीदतु यस्य स्मृत्या
च नामोक्त्या तपोयज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमिति विष्णुहृदयमंत्रः ओश्रावये
ति चत्वारि अक्षराणि अस्तु श्रौषडिति चत्वारि यजेति द्वे ये यजामहे इति पंच वौषडिति द्वे एतैर्योहूय
ते स यज्ञपुरुषो विष्णुर्मम प्रसीदत्विति एतदनुसारि शातपथे वाक्यं तदेतद्यज्ञस्याप्यायनं यामो श्रावयेत्यार
भ्य ओश्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पंचाक्षरं द्व्य
क्षरो वषट्कार इति उक्तं जयासंभवे मत्स्यपुराणे अभावे सर्वविद्यानां गायत्रीजपमाचरेदिति इमां ज्ञात्वा
न्नं प्रकीर्य सकृत्सकृद्योद्वा पूर्ववद्गायत्रीं जपित्वा मधुमतीर्मधु मध्विति च इमान्ब्राह्मणान्ज्ञात्वा अ
न्नं ब्राह्मणानामग्रतोऽन्नं प्रकीरेत् इति मनुः सर्ववर्णी कुमन्त्राग्र्यं स्त्रीयाश्चावधारिणा परिदिषेत्क्रमवता २२

मग्रतो विकिरन्भुवि बृहस्पतिः सोदकं विकिरेदन्नमेवं वेमे समवरेत् अग्निदग्धाश्चयेतीवाये प्यदग्धाः कुले
मम भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिमिति तत्रैव सर्वमन्नमेकत्र पात्रे कृत्वा मधु विसतिलमुदकेनिषिं
च्यावामेत् ब्राह्मणानामग्रतोऽग्रे प्रकिरेदिति कर्कोवार्याः पंक्तिमूर्द्धन्यस्योत्तरदिग्भागे अरत्निमात्रे विकि
रेदद्यादिति हेमाद्रिः तीर्थश्राद्धे विकिराऽभावः सकृत्सकृदिति वीप्सा ब्राह्मणायेत्तया तेन वैश्वदेविकद्वि
जपूर्वकमेकैकस्य पाणौ तत्तदायोपू। णार्थे सकृत्सकृदुदकं दद्यात् पूर्ववदिति प्रणवेन व्याहृतिभिश्चस
र्वां गायत्रीं सकृत्त्रिर्वा जपेत् मधुमतीरिति मधुवाता इति तिस्रः ऋच उच्यते मधु मधिति मधुमधुमधु इ
त्येवं त्रिरुच्चारणं कर्तव्यं तृप्ताः स्थेति पृच्छति ब्राह्मणाः तृप्ताः स्म इत्येवं ब्राह्मणानभिपृच्छति प्रश्नं करो
ति अत्र बहुवचनात्सर्वे प्रष्टव्याः तृप्ताः स्म इत्यनुज्ञातः शेषमन्नमनुज्ञाप्य सर्वमन्नमेकतो हृत्वोच्छि

ष्टसमीपेदर्भेषुस्त्रींस्त्रीन्पिंडाननवनेज्यदद्यात्॥ ततस्तेर्हिंसैः त्वमास्मइत्यनुत्तानः शेषमन्त्रमनुत्ताप्यनु
नव. गा. २८ र्वरितस्यात्रस्यानुत्तादापपित्रासर्वमन्त्रेसर्वप्रकारेमाषाभवर्जंपिंडपर्यामेपकस्मिन्पात्रेउद्धरेत्तदा
र्भेषुत्रीस्त्रीन्पिंडानितिदर्भग्रहणेउपमूलसकृदाछिन्नोपलक्षणार्थे त्रीस्त्रीनितिवीप्सामात्रामहा
भिप्रायेणपिंडपितृयज्ञवदुपचारइतिसूत्रितत्वादत्रपिंडपितृयज्ञवत्पिंडदाने तेनोल्मुखत्यपहताइ
25 त्यपेरणावोल्मुकेपरस्तात्करोतीत्यारभ्यवयस्युतरेयजमानलोमानिवेत्सतेलभ्यते अत्राहयाज्ञवा
ल्क्यः सर्वमन्त्रमुपादायसतिलेदक्षिणामुखस्तुग्राछिष्टसन्निधौपिंडान्दद्याद्धोपितृयज्ञवदिति अत्र
पदार्थक्रमः उल्लेखनं उदकालेभः उल्मुकनिधानं अवनेजनं सकृदाछिन्नास्तरणं पिंडदानं
अत्रपितरउस्त्रुक्तोदङ्गानमनं आतत्यजपः पुनरवनेजनं नीवीविसर्गः नमोवइतिषट्नमस्का २८

रा: स्नत्रदानं स्रत्त्रकंप्रजने इति क्रमः आचांते द्विति के एके आचार्या आचांतेषु ब्राह्मणेषु पिंडदा ५१

नमिच्छंति आचांते सदकं पुष्पाण्यक्षतानर्घ्योदकं च दद्यात् ब्राह्मणेषु कृताचमनेषु सत्स्वते भ्यः

उदकादिकं च दद्यात् (ब्राह्मणेषु कृताचमनेषु स) पुष्पाणि वा प्रतिपिंडानि पद्मोत्पलमाल्लिकाद्य

पिकाशतपत्रचंपकादीनि गंधवन्ति पुष्पाण्यपि दद्यात् तत्रायं प्रयोग उक्तश्छंदोगपरिशिष्टे अ

पात्र भूमिमासिंचेत् नोदितमिति शिवा आपः संतु इति युग्मा नेवोदकेन च सौमनस्यमस्त्विति

५१ पुष्पदानमनंतरं अक्षतं चारिष्टं चास्त्वित्यक्षतान् प्रतिपादयेत् अक्षतोदकदानं तु अर्घ्यदानवदिष्य:

पु:

५१ ते षष्ठ्यैव नित्यं तत्कुर्यात्त्र च तु ष्णींकदाचन युग्मानिति हस्तद्वयपरं प्रकरणात् पित्र्ये फले त्वाभावा

द स्तेप्रक्षेपमात्रस्य विधानादिदं जलादित्रिकं दैवे पित्र्ये च कार्यं यज्ञोपवीतिनादेयमिति शांखायना

नव॰
ग॰
२५

चार्याः तथाशक्तानत्वेऽपि ततः पुष्पाणि सव्येनोदकानि पृथक्पृथगिति इदं जलादिदानं दैवे सव्येनापि
पित्र्ये त्वपसव्येनेति कर्काचार्याः हस्तेष्वर्प्यादि तानामयोर्विरपारणे पयोयगाभावाच्छुचौ देशे स्थापनमे
व पुष्पाणि त्वत्र ब्राह्मणाः यजमानायाशिषं प्रयच्छन्तीति मत्स्यपुराणे आशीर्वादे पुनर्दद्याज्जलपुष्पादानतो
दकं दत्वाशीः प्रतिगृह्णीयाद्द्विजेभ्यः प्राङ्मुखो द्विजः अक्षय्योदकशब्देन दत्वात्र पादनदेवानंतप्रार्थ
न सेवयीजलमभिधीयते तत्र पितृब्राह्मणेभ्यः इति कर्कः सर्वेभ्यो दद्यादिति स्मृत्यर्थसारे अघो
राः पितरः संतु संत्वित्युक्ते गोत्रं नो वर्द्धतामित्युक्ते दातारो नोऽभिवर्द्धन्तां वेदाः संततिरेव च श्रद्धा च
नो माव्यगमद्बहुदेयं च नोऽस्त्विति आशीः प्रार्थनं प्रपंचयति तत्र यजमानः अघोराः पितरः स
न्त्विति ब्रूयात् ब्राह्मणाश्च संत्विति ब्रूयुः गोत्रं नो वर्द्धतामिति आह ब्राह्मणाश्च वर्द्ध २५

25

नामित्युक्ते दातारो नोभिवर्द्धन्तामिति ब्रूयात् द्विजैर्वर्द्धन्तामित्युक्ते कर्मोवेदाः वर्द्धन्तामिति ब्रूयात् व
र्द्धन्तामिति ब्राह्मणाः श्रद्धावनो मा व्यगमत् इति यजमानः मा गादिति ब्राह्मणाः बहुदेयं च नो
स्त्विति कर्त्ता अस्त्विति ते ब्रूयुः अत्र मनुराह दक्षिणां दि शर्म्माकांक्ष्या चैतेमान्वरान्पितॄन् इति
आशिषः प्रतिगृह्य स्वधावाचनीयान्सपवित्रान्कुशानास्तीर्य स्वधां वाचयिष्ये इति पृच्छति तु
र्म प्रकारेण श्रीग्रहणं कृत्वा स्वधावाचनीयसंज्ञकान्सपवित्रान्कुशानास्तीर्य पिंडसमीपभू
मौ कृत्वा स्वधां वाचयिष्ये इति पंक्तिमूर्द्धन्यं सर्वान्वा पृष्ट्वेन सपवित्रारसाग्रानिस्पर्थः स्रुजपात्रो
परिस्थितं पवित्रेण एवं यवित्रेण त्वयवित्रैः सह समानीय पिंडानां पश्चिमतो दक्षिणाग्राणि नि
धाय स्वधां वाचयिष्ये इति पृष्ट्वेतरैः इति हेमाद्रिः सकुशानि पवित्राणि पिंडानामुपर्यास्तीर्य स्वधां

वाववपिष्य इति पृष्ठे दितिदेवयाज्ञिकाः ॥ वाव्यतामित्यनुज्ञातः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो
मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यश्च स्वधोच्यतामिति ततस्तैर्द्विजैर्वाच्यतामित्यनु
ज्ञातः पितृभ्य इत्यादि स्वधोस्तु उच्यतामित्येवं मंत्रमुदाहरेत् अस्तु स्वधेत्युच्यमाने स्वधावाचनीयेष्वपो
निषिंचत् ऊर्जमिति अस्तु स्वधेत्युच्यमाने सति स्वधावाचनीयेषु दकं निषिंचत् ऊर्जमित्यनेन मंत्रेण आसे
चनप्रवचनयोगानामंगांगिभावः अवसइ निदेशाव्याख्यानवः अतो हविश्श्राद्धेपि भवति मंत्रश्चायंस
मवेतार्थः अतोस्य मातृश्राद्धे मातृभ्यः पितामहीभ्य इत्याद्यूहः संख्यासमवेतार्थः अतश्चैकोद्दिष्टे
नेहः उक्तानेपात्रेकृतायथाशक्ति दक्षिणां दद्याद्ब्राह्मणेभ्यः अर्वानंतरं पत्नात्रेन्सुश्रीकृते तडनंतान
ददते देवो दक्षिणाभिरदत्वये तत्सयत्ते देनं दक्षिणाभिरदत्वये तत्सस्मा दक्षिणाना मेति स्वस्तौ गोभ्
२८

हिरण्यवासांसिकन्याभवनभूषणं दद्याद्दक्षिणं विप्राणामात्मनःपितुरेववेति अदक्षिणंश्राद्धंवन
कुर्यात् तथाचश्राद्धकल्पे नकुर्याद्दक्षिणाहीनेदेहेऽश्राद्धमदक्षिणमिति तथाचयिशातयथब्रा
ह्मणे तस्मान्नादक्षिणंहविःस्यादिति विश्वेदेवाःप्रीयन्तामितिदेवेवाचयित्वावाजेवाजेवतेतिविस
ज्य वाचयितेतिकारितनादध्येषणंभवति विश्वेदेवाःप्रीयन्तामितिब्रूहीति देवब्राह्मणाश्चविश्वेदेवाः
प्रीयन्तामितिब्रूयुः ततोवाजेवाजेवतेत्यनेनमन्त्रेणविप्रान्विसर्जयेत् विसर्जनेतुपितृपूर्वंतथाचयाज्ञव
ल्क्यः वाजेवाजेइतिप्रीतः पितृपूर्वंविसर्जयेत् इति निमन्त्रणादिपदार्थेजातेदेवपूर्वंभवति विसर्जने
तुपितृपूर्वमितिमेधातिथिः देवलोपि पूर्वंसम्पादयेत्पितॄन्वाच्यतामितिवब्रुवन् उपस्थितानन्तुगच्छे
त्तेभ्यःशेषंवसंहरेत् पश्चात्वैश्वदेविकान्विप्रान्उत्थापयेत्तथा यतेहिपूर्वमासीनाःसमुत्तिष्ठेतिप

नव० ग० २८

ग्निमारभेत् अमावास्येन्मनुव्रज्य प्रदक्षिणीकृत्य प्रविशेत् अमावास्ये नित्यमेवैनमनुव्रज्याप्रयात्
हि ज्ञात्वा सीमांते गत्वा स्वगेहं प्रविशेत् इति गदाधरभाष्ये स्थालीपाककण्डिका ॥ अथ प्रयोगपद्धतिः तत्र
कालाः अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयं विषुवत्सूर्यसंक्रमो व्यतीपातो गजच्छाया ग्रहणयु
गादिमन्वादयस्तथा विशिष्टकाले वस्तुनाहाद्द्रव्यब्राह्मणसंपत्त्यावा तत्र हविष्यं स्याधाः कालाः
अथ श्राद्धाधिकारिनिर्णयः प्रमीतयोः पित्रोर्मुख्यो गौणश्च पुत्राः श्राद्धं कुर्युः तदभावे दायहरः
पौत्रः पुत्रिकापुत्रो वा तदभावे सहोदरास्तत्सन्ततिर्वा तदभावे पुरोहितः तदभावे भृत्यास्सुहृदश्च कु
र्युः सर्वाभावे नरपतिस्तज्जातीयैः कारयेत् नरपतिः सर्ववर्णानां बान्धव इति स्मरणात् ब्राह्मविवा
होढासाध्वी चेत्पुत्राभावे पत्न्येवाधिकारिणी यदि क्रयः कृतो न भवति क्रयक्रीता त्वयानारी न सा प २८

27

त्नीविधीयते नस्मादैवेनसापिश्चेदासीतांकवयोविदुः सर्वाभावेनग्रस्याप्यमंत्रकेश्राद्धेधिकारः एकएवचे
त्पुत्रस्तदासावनुपनीतोपिकृतचौलश्चेदमंत्रकंश्राद्धंकुर्यात् अपुत्रायाःपतिर्दद्यात्सपुत्रायास्सुतःक्वचि
त् पित्राश्राद्धेनकर्त्तव्यंपुत्राणांचकदाचन भ्रात्रानवैवकर्त्तव्यंभ्रातृणांचकनीयसां अपिस्नेहेनकुर्याचे
त्सपिंडीकरणंविनागायायांतुविशेषेणज्यायानपिसमाचरेत् धनहारित्वादिनियमाभावेपिप्री
त्यायस्यकस्यापिवर्णस्यश्राद्धेकृतेमहत्फलमाह शातातपः प्रीत्याश्राद्धंतुकर्त्तव्यंसर्वेषांवर्णलिं
गिनां एवंकुर्वन्नरःसम्यक्महतीश्रियमाप्नुयात् ब्राह्मणोह्यसवर्णस्ययःकरोत्यौर्ध्वदेहिकं तद्वर्णे
।त्वमवाप्नोति इहलोकेपरत्रच दौहित्रेणतुसपिंडीकरणादिव्यतिरेकेणपदापदापितृश्राद्धंवन्नदान
दामातामहश्राद्धंकर्त्तव्यमेव पितरोयत्रपूज्यंतेतत्रमातामहाअपि अविशेषेणकर्त्तव्यंविशेषान्नर

नव॰
ग॰
२८

केवलेनैव तत्पिंडपितृपत्न्यतिरिक्तविषयं अन्वष्टकासु सर्वैः सपत्नीकर्णेतन्नयैव पश्चादन्वष्टक्यात्त्रि॰
पार्वणे सपिंडीकरणे मः पुनर्धनहारी दौहित्रः तेन नवश्राद्धापि कार्यमेव तथाहेतन्त्रकथा
वेणमेव साग्निकानामेकोद्दिष्टं वा पोपन्नश्राद्धीत सतत्सैव श्राद्धं कुर्यादिति स्मरणात् मातामह
नवश्राद्धं अवश्यं यतन हारिणा दौहित्रेण कार्यं दौहित्रेणार्थनिःहात्म्य कर्तव्ये विधिवत्तदा श्राद्धेह
पतनात्कुर्यात्स सपिंडोदकक्रिया पत्नु केवले मातामहेनैवं हि पुत्रिकापुत्रः समातामहस्य
वनियमेन श्राद्धं कुर्यात् पुत्रिकापुत्रश्राद्धे विशेषमाहामनुः मातुः प्रथमतः पिंडं निर्वपेत्पु
त्रिकासुतः द्वितीयंतु पितुस्तस्यास्तृतीयमपितुः पितुः आश्वलायनेपुत्रिकापुत्रेडपानसो
कोविशेषः मातामहस्यैवमात्रादिषु तत्केपितृपूर्वकं मातृतः पितृतोयस्मादधिकारोस्त्रियस्तेत २८

२८

इति देवत्रजे तद्व्यामुष्यायणे देवलोके द्व्यामुष्यायणकादशकर्द्दोभ्यां पिंडोदकेष्वंशभागीति द्वाभ्यां पितृ
वर्गाभ्यामित्यर्थः द्विपितुः पिंडदाने स्यात्पिंडे पिंडे द्विनामता षण्णामत्रत्रयः पिंडाएकैकं तु तद्ये
हनि पोषकः प्रथमः ततो जनकः अत्र कमविशेषमाह मरीचिः सगोत्रो वाप्यगोत्रो वा यो भवेद्वि
यवा सुतः पिंडश्राद्धविधानेव द्वे त्रिणश्राग्नि निर्वपेत् वीजिने तु ततः पश्चात् द्वेत्रिजीवति वेतकवित्
वीजिनेदशुरादौ तु मृते पश्चात्तदीयत इति जीवत्पितृकस्यापिकृ वित्कवित् श्राद्धाधिकारः यत्तुमै
त्रायणीयपरिशिष्टे विशेषो दर्शितः उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे तीर्थे ब्राह्मण आपाते
षडेते जीवितः पितुः पुत्रस्य श्राद्धकाल इति शेषः जीवत्पितृकस्याप्यतिपादि मातामहश्राद्धफला
तिशयप्राप्तये नियमेन कार्यं जातमात्रोपि दौहित्रो विद्यमानेपि मातुले कुर्यान्मातामहश्राद्धं प्रति

यथाश्विने सिते ३ इति अथ श्राद्धब्राह्मणलक्षणं तत्र महाभारते विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व एव हि यांस्तु
यांस्तु प्रवक्ष्यामि ज्ञेयास्ते पंक्तिपावनाः त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित् ब्रह्मदेयानुसंतानः
छंदोगो ज्येष्ठसामगः मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः ऋतुकालाभिगामी च धर्मपत्नी
षु यः सदा वेदविद्याव्रतस्नातो विप्रः पंक्तिं पुनाति ते अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः सत्यवादी
धर्मशीलः स्वकर्मनिरतश्च यः ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः मखेषु च समंत्रेषु भवंत्य
वभृथप्लुताः अक्रोधना ह्यचपलाः श्राद्धे ग्राह्यास्ते द्विजाः सर्वभूतहिता ये च श्राद्धे चैतान्निमंत्रयेत्
इति यथोक्तगुणब्राह्मणाभावे किंचित् हीनगुणा अपि वैश्वदेविकार्थे उपवेशनीयाः पित्र्ये तु यथोक्त
गुणा एव भोज्याः गयायां तु निर्गुणा अपि तत्रत्या एव द्विजा भोज्याः यथोक्तब्राह्मणाभावे मातामहमातु

लस्वस्त्रीयश्वशुरदौहित्रजामातृस्वस्त्रीकयाज्यशिष्याश्चापि गुणवन्तश्चेच्छ्राद्धे भोजनीयाः अथैकस्याप्यब्राह्मणस्या
लाभे अनुकल्पान्तरमुक्तं प्रभासखण्डे अलाभे ब्राह्मणस्यैव कौशः कार्यो वटुः प्रिये एवमप्यावरे श्राद्धे षड्दैवं समस
माहितः विभक्तिकारे पश्यन्तु पितृहा समजायते कौशः कुशमयः वटुः लघु मनुष्याकृतिः तं वटुं ब्राह्मण
त्वेन परिकल्प्य सर्वं श्राद्धं समाचरेत् विभक्तिः कर्मणः श्राद्धे लोपः इति पापं तत्र कुर्यात् तथा पात्रालाभे वि
लेकृत्वापि तत्पत्रविधिं नरः निधाय वा दर्भवटुं नासनेषु समाहितः प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत्
सर्वाभावे त्विति पदं योगवेदश्चाद पात्रे श्रुते नैव ग्रामस्य लोपोऽस्ति पैतृकस्य विशेषतः इति देवलः प्रैषानुप्रैषसंयु
क्तमिति श्राद्धं संपन्नं सुसंपन्नमित्यादि प्रश्नप्रतिवचने स्वयमेव वदेदित्यर्थः अथ नियमाः मनोवाक्कर्मभिः
हिंसानिमन्त्रितब्राह्मणपरित्यागस्ताम्बूलदन्तरक्षकर्माभ्यञ्जनदन्तधावनपरित्यागश्च इति कर्तृनियमाः नि

नव। ग्र। २।

मंत्रणमभ्युपगम्यानध्यक्रमणमन्यत्राभोजनमेकत्रनिमंत्रितस्यान्येषामन्नादेरप्यग्रहणं मातुलस्यकृतपका
लायनतिक्रमणं इति द्विजनियमाः निमंत्रणादु परिश्राद्धान्वयव्यतिरिक्तभोजनपुनर्भोजनासत्यवदना।
शौचमत्वरितत्वमृतौ स्वदारेष्वपि नियुक्तस्यापि मैथुनाकरणं विशेषतः शूद्रायाः परिहरणं श्रमस्वाध्या
याक्रौधकौर्यकलहहस्तभारोद्वहनप्रतिग्रहप्रमादमदमोहलोभाहंकाराकार्याण्येतानिपवर्जे इत्युभ
यनियमाः अथश्राद्धदिनात्प्राचीनदिनकृत्यमिति तत्र कर्तास्वगृहे निरामिषंभुक्त्वा ब्राह्मणाविमंत्रणं।
प्रदोषांतेकरोति विलुसरणं प्राणायामत्रयं कृत्वायज्ञोपवीतीउदङ्मुखः प्राङ्मुखस्य द्विजस्य दक्षि।
णंजान्वपस्पृश्य ॐ दैवेक्षणः क्रियतामिति वदेत् ॐ तथेतिप्रत्युक्तिः प्राप्नोतिभवान् इत्युक्ते प्राप्नवा
नीतिप्रत्युक्तिः ततः क्रोधनैरित्यादिश्रावयेत् ॐ अमुकगोत्रस्यामुकशर्मणस्यपितुः सपत्नी। २

कर्त्तव्यश्राद्धदानंक्रियतामित्यादि एवमयंपितृत्वेयंपितामहस्यायंप्रपितामहस्येत्यादिनिर्देशेनकृत्वा मातामह
द्विजान्निमंत्रयेत् यावन्तःसंख्याश्चपितृद्विजास्तावन्तःसंख्याएवमातामहद्विजास्तथैवनिमंत्रणीया ततोऽक्रोध
नैःशौचपरैः सततंब्रह्मचारिभिः भवितव्यंभवद्भिश्चमयाचश्राद्धकर्मणिइतिनियमान्श्रावयेत् तं
त्रेणवावैश्वदेविकं इतिश्राद्धदिनात्प्राचीनदिनकृत्यं पूर्वेदिनेनिमंत्रणासंभवेश्राद्धदिनेप्रातर्निमंत्रणं
अथश्राद्धदिनकृत्यम् तत्रदंतधावनवर्जंप्रातःकालीनंकर्मकृत्वाउद्वर्तनद्रव्यस्नानीयतिलामलकल्का
न्ताम्रपात्रेसंभृतान्कृतश्मश्रुनखेभ्योनिमंत्रितद्विजेभ्योदैवपूर्वकंप्रेष्यद्वारादापयेत् ततःपाकभूमेः
गोमयोपलेपनादिसंस्कारकरणं महानसेचसचैलस्नानःसपत्नीकोयजमानःस्वयंपाकमा
रभेत् असंभवेतुशुचिभिःस्नातैःसवर्णैर्वाकारयेत् ततःश्राद्धार्थमुदकमानीयपत्न्यासहाः

नव॰
ग॰
३१

शुचिशुक्लवासाः श्राद्धदेशमागत्योदकं स्थापयेत् अथापराह्णकृत्ये तत्रागतान् द्विजान् दृष्ट्वा भवतां स्वा
गतमिति प्रत्येकं ब्रूयात् स्वागतमिति द्विजैर्वक्तव्ये ततस्तेभ्यः उदकदाने मंडलकरणे आचमनार्थं ज
लदाने तैराचमनकरणे ततो यजमानस्य पादप्रक्षालनपूर्वकं द्विराचमने ब्राह्मणानामुपवेशने आ
स्मिन्नवसरे दीयानां स्थापने ततः कर्त्तोपविश्य गयायै नमः गदाधराय नमः इति वदेत् पुंडरीकाक्षं
स्मृत्वा देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः इति त्रिः पठेत्
ततश्च देशादिकालज्ञाने कृत्वा ऽमुकगोत्राणा ऽस्मित्पितृपितामहानां सपत्नीकानां वसुरुद्रादित्यस्व
रूपाणां तथा मातामहादीनां संकीर्त्तने कृत्वा पार्वणैकविधिना ऽमुकनिमित्तं श्राद्धं करिष्य इति सक
ल्पं कुर्यात् ततो निहन्मि सर्वं यदमेध्यवद्भवेत् निहन्मि सर्वान् परिदानवासुरान् यक्षाश्च रक्षांसि पिशा

31

वगुह्यकाहतामयापात्तयानाश्च सर्वं इति पठेत् नीवीबंधनं ततस्तिलारक्षेत्तस्तदानूं दर्भैर् रक्षेत् उशन्त
सान् पेक्षि वैश्वोत्रियोरक्षेदतिथिः सर्वरक्षकः इतिद्वारितिलकुशानिक्षेपः अग्निष्वात्ताः पितृगणाः प्राची
रक्षेतुमेदिशं तथाबर्हिषदः योतुयाम्यायेपितरस्तथा प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपा ऊ
र्ध्वंतस्व यमारक्षेत्कव्यवाहनलोप्ययः रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः सर्वतश्चाधिपस्तेषांयमो
रक्षांकरोतुमे इतियथालिंगंदिशिदिशितिलान्प्रकिरेत् रक्षोघ्नेतिसर्वतःप्रकिरणं ततःकर्मार्थं
जलाभिमंत्रणं दर्भैरालोडयन् पदेवाइतिवेन अन्तर्कुंभेजलकार्यमनेन दुष्टदृष्टिनिपातनादिदूषितः
पाकः पूतोभवतीतिपाकप्रोक्षणंसर्वं पुरूरवार्द्रवसंज्ञकानांविश्वेषांदेवानामिदमासनं अपसव्यम्
